# 63 - त्रिषष्टितम दशकम्
# गोवर्द्धन उद्धारणम्

दद्दशिरे किल तत्क्षण मक्षत स्तनित जृम्भित कम्पित दिक्तटा: ।
सुषमया भवदङ्ग तुलां गता: व्रजप दोपरि वारिधरास् त्वया ॥॥63-1॥

विपुल करक मिश्रै: तोय धारा निपातै:
दिशि दिशि पशुपानां मण्डले दण्ड्यमाने ।
कुपित हरि कृतान् न: पाहि पाहीति तेषां
वचन मजित श्रृण्वन् मा बिभी तेत्येभाणी: ॥ ॥63-2॥

कुल इह खलु गोत्रो दैवतं गोत्र शत्रो:
विहति मिह स रुन्ध्यात् को नु वस् संशयोऽस्मिन् ।
इति सहसित वादी देव गोवर्द्ध नाद्रिं
त्वरित मुदमुमूलो मूलतो बाल दोर्भ्याम् ॥ ॥63-3॥

तदनु गिरिवरस्य प्रोद्धृतस् यास्य तावत्
सिकतिल मृदु देशे दूरतो वारितापे ।
परिकर परिमिश्रान् धेनु गोपान् अधस्तात्
उपनिदध दधत्था: हस्त पद्मेन शैलम् ॥ ॥63-4॥

भवति विधृत शैले बालिकाभिर् वयस्यै:
अपि विहित विलासं केलि लापादि लोले ।
सविध मिलित धेनू: एक हस्तेन कण्डू-
-यति सति पशुपाला: तोष मैषन्त सर्वे ॥ ॥63-5॥

अति महान् गिरि रेष तु वामके कर सरोरुहि तं धरते चिरम् ।
किमिद मद्भुत मद्रि बलन्विति त्वदवलोकिभि राकथि गोपकैः ॥॥63-6॥

अहह धाष्ट्‍र्य ममुष्य वटोर् गिरिं व्यथित बाहु रसा ववरोपयेत् ।
इति हरिस् त्वयि बद्ध विगर्हणः दिवस सप्तक मुग्र मवर्षयत् ॥॥63-7॥

अचलति त्वयि देव पदात् पदं गलित सर्व जले च घनोत्करे ।
अपहृते मरुता मरुतां पतिः त्व दभिशङ्कित धीस् समुपाद्रवत् ॥॥63-8॥

शम मुपेयुषि वर्षभरे तदा पशुप धेनुकुले च विनिर्गते ।
भुवि विभो समुपाहित भू धरः प्रमुदितैः पशुपैः परिरेभिषे ॥ ॥63-9॥

धरणि मेव पुरा धृतवा नसि क्षिति धरोद्धरणे तव कश् श्रमः ।
इति नुतस् त्रिदशैः कमला पते गुरु पुरालय पालय मां गदात् ॥॥63-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥